# नवग्रह स्तोत्रं

जपा कुसुम संकाशं काश्यपेयं महाद्युतिम् ।
तमोरिं सर्व पापघ्नं प्रणतोऽस्मि दिवाकरम् ।। १ ।।

दधिशंख तुषाराभं क्षीरार्णव समुद्भवम् ।
नमामि शशिनं सोमं शंभोर्मुकुटभूषणम् ।। २ ।।

धरणीगर्भ संभूतं विद्युत् कांति समप्रभम् ।
कुमारं शक्तिहस्तंतं मंगळं प्रणमाम्यहम् ।। ३ ।।

प्रियंगुकालिकाश्यामं रूपेणाप्रतिमांबुधम् ।
सौम्यंसत्वगुणोपेतं तं बुधं प्रणमाम्यहम् ।। ४ ।।

देवानांच ऋषिणांच गुरुं कांचन सन्निभम् ।
बुद्धिमंतं त्रिलोकेशं तं नमामि बृहस्पतिम् ।। ५ ।।

हिमकुंदमृणालाभं दैत्यानां परमं गुरुम् ।
सर्व शास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम् ।। ६ ।।

नीलांजन समाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तांड संभूतं तं नमामि शनैश्चरम् ।। ७ ।।

अर्धकायं महावीर्यं चंद्रादित्य विमर्दनम् ।
सिंहिकागर्भ संभूतं तं राहुं प्रणमाम्यहम् ॥ ८ ॥

पलाषपुष्प संकाशं तारकाग्रह मस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ९ ॥

इति व्यासं मुखोद्गीतं यः पठेस्तु समाहितौ ।
दिवावाय दिवारात्रौ विघ्नः शांतिर्भविष्यति ॥ १० ॥

नर नारी नृपाणांच भवे दुःस्वप्न नाशनम् ।
ऐश्वर्यमतुलां तेषां आरोग्यं पुष्टिवर्धनम् ॥ ११ ॥

ग्रह नक्षत्र जाःपीडा स्तस्कराग्नि समुद्भवाम् ।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥ १२ ॥

ॐ इति श्री नवग्रह स्तोत्रं संपूर्णम्